दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लाष्टमी
भाद्रपद 04 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-8 ■ वर्ष-5 ■ अङ्क-301 | 1 | अगस्त 20, 2026 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

1 शिक्षामन्त्री प्रल्हाद-जोशी-महोदयः उच्चशिक्षाविभागस्य वरिष्ठैरधिकारिभिः सह अमिलत्

3 खाद्यपदार्थानाम्, इन्धनस्य अन्य-उत्पादन-सामग्रीणां च वर्धमान-मूल्यैः व्यापक-मुद्रास्फीतेः सङ्कटः - भारतीय-रिज़र्व-बैङ्क-शासकः

8 पितरौ सन्ततिम् सम्पत्तेः निष्कासयितुम् अधिकारः सर्वोच्चन्यायालयेन प्रयागराज-उच्चन्यायालयस्य आदेशः निरस्तः

## केन्द्रीय-मन्त्रिमण्डलेन एकचत्त्वारिंशदधिक-त्रयोदशसहस्रकोटिरुप्यकाणां पञ्च-परियोजनाः अनुमोदिताः, यत्र चतस्रः रेल-परियोजनाः एका राजमार्ग-परियोजना वर्तते



प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां समुपविष्टेन केन्द्रीय-मन्त्रिमण्डलेन एकचत्त्वारिंशदधिक-त्रयोदशसहस्रकोटिरुप्यकाणां पञ्च-प्रमुख-परियोजनानाम् अनुमोदनं कृतम्। एतासु चतस्रः रेल-परियोजनाः एका च राजमार्ग-परियोजना समाविष्टा अस्ति। नवदिल्ल्यां मन्त्रिमण्डल-उपवेशनानन्तरं प्रसार माध्यमान् सम्बोधयन् केन्द्रीय-सूचना-प्रसारणमन्त्री अश्विनी-वैष्णवः असूचयत् यत् रेल-विभागस्य चतस्रः बहुमार्ग-परियोजनाः पश्चिमवङ्ग-ओडिशा-तमिळनाडु-आन्ध्रप्रदेश-राज्यानाम् अष्ट-जनपदान् समावेक्ष्यन्ति। एतासु खड़गपुर-भद्रक-चतुर्थ-रेलमार्गः, भद्रक-हरिदासपुर-चतुर्थ-रेलमार्गः, गुम्मिडिपुण्डि-गूडूर-तृतीय-चतुर्थ-रेलमार्गः, सहैव कटक-पारादीप-तृतीय-चतुर्थ-रेलमार्ग-परियोजनाः समाविष्टाः सन्ति। अनेन भारतीय-रेलमार्ग-सञ्जाले प्रायः दशाधिक-चतुश्शत किलोमीटर-परिमितस्य नूतन-मार्गस्य योगः भविष्यति। मन्त्रिणा स्पष्टीकृतं यत् पञ्चाशदधिक-चतुश्शतोत्तर-नवसहस्रकोटि रूप्यकाणां व्ययेन युक्ताः एताः रेल-परियोजनाः द्विसहस्रतमस्य त्रिंशत्, एकत्रिंशत्-वर्ष-पर्यन्तं सम्पूर्णाः भविष्यन्ति। श्रीवैष्णवः अवदत् यत् मार्ग-क्षमतायाः वृद्ध्या यातायात-गतिशीलतायां महान् परिष्कारः भविष्यति, येन भारतीय-रेलवे-सञ्चालन-दक्षता सहैव सेवा-विश्वसनीयता सुदृढा संवर्तिष्यते। एताभिः परियोजनाभिः प्रायः अष्टचत्त्वारिंशदधिक-चतुश्शतोत्तर-षट्सहस्रग्रामाणां सम्पर्क-व्यवस्था सुगमा भविष्यति।

## अद्यतनीयं सुभाषितम्

**आत्मा यस्य वशे नास्ति कुतस्तस्य परे जनाः।**
**आत्मानं वशमानीय त्रैलोक्यं वर्तते वशे।।**

भावार्थः- जिस व्यक्ति का स्वयं अपने ऊपर ही वश नहीं हो वह भला अन्य व्यक्तियों को कैसे अपने वश में कर सकता है? यदि किसी व्यक्ति का अपने ऊपर पूर्ण नियन्त्रण हो तो वह सारे संसार को अपने वश में कर सकता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## भारतस्य आर्थिक विकासः सम्प्रति वैश्विक-स्तरे मान्यतां प्राप्नोति- अश्विनी वैष्णवः



केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः प्रतिपादितवान् यत् भारतस्य आर्थिक विकासः सम्प्रति वैश्विक-स्तरे मान्यतां प्राप्नोति सहैव देशः षट्-प्रतिशतात् अष्ट-प्रतिशतं यावत् तीव्र-गत्या संवर्धते। सः अवदत् यत् विकासस्य अयम् उपक्रमः चतुर्षु प्रमुख-स्तम्भेषु आधारितो वर्तते। नवदिल्ल्यां षड्विंशत्यधिक-द्विसहस्रतमस्य उत्तर-प्रदेश-जापान-निवेश-शिखर सम्मेलनम् सम्बोधयन् श्रीवैष्णवः असूचयत् यत् निवेशः देशस्य विकास-यात्रायाः महत्वपूर्णः भागः वर्तते, यत्र भारतं प्रतिवर्षं प्रायः त्रिंशदधिकैकशत-अर्बुद-अमेरिकी डॉलरमितं धनं निवेशयति। मन्त्रिणा स्पष्टीकृतं यत् वर्धित-आर्थिक गतिविधिभिः देशः सततं विकासं रक्षितुं, नूतन-उद्योगावसरान् स्रष्टुं, अथ च विकासस्य लाभान् समाजस्य प्रत्येकं वर्गं यावत् प्रापयितुं सफलो जातः। अत्रावसरे उत्तर-प्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः प्रतिपादितवान् यत् भारत-जापानयोः सहभागिता विकासे, प्रौद्योगिक्यां, समृद्धौ च आधारिता विद्यते। सः प्रोक्तवान् यत् उत्तर-प्रदेशः सम्प्रति भारतस्य शीर्ष-त्रिषु अर्थव्यवस्थासु अन्यतमरूपेण उद्भूतः सहैव देशस्य समग्र-विकासस्य चालकश्च संवृत्तः ।

## भारतीय-सूचना-सेवायाः भारतीय-सांख्यिकी-सेवायाश्च प्रशिक्षु अधिकारिणः नवदिल्ल्यां राष्ट्रपतिना सह शिष्टाचार-मेलनं अकुर्वन्



राष्ट्रपतिपदासीना द्रौपदीमुर्मुः प्रावोचत् यत् प्रौद्योगिक्याः, प्रसारमाध्यमस्य, अर्थनीतेः अथ च लोकनीति-क्षेत्राणां स्थितिः तीव्र-गत्या परिवर्तते। सा एतत् तदा प्रतिपादितवती यदा भारतीय-सूचना-सेवायाः भारतीय-सांख्यिकी-सेवायाश्च प्रशिक्षु अधिकारिणः नवदिल्ल्यां राष्ट्रपति भवने तया सह शिष्टाचार-मेलनं अकुर्वन् । अवसरेऽस्मिन् राष्ट्रपतिः अधिकारिभ्यः परामृष्टवती यत् ते स्व-निर्णयेषु विवेकशीलाः, व्यवहारे करुणापराः, सत्यनिष्ठाश्च भवेयुः। राष्ट्रपतिना एतदपि प्रतिपादितं यत् तेभ्यः प्रदत्तः अधिकारः निष्पक्षतया, विनयेन, समर्पणेन च जनतायाः सेवायै एकं महत्तरम् उत्तरदायित्वं धारयति।

## सर्वोच्च न्यायालयः नीट-यूजी-प्रश्नपत्र-गोप्यताभङ्ग-प्रकरणात् परं परीक्षा-परिष्कारे राधाकृष्णन्-समित्याः संस्तुतीनां क्रियान्वयनाय केन्द्र-सर्वकारस्य प्रतिवचनम् ऐच्छत्



सर्वोच्च न्यायालयेन प्रतिपादितं यत् भविष्ये प्रश्नपत्र-गोप्यताभङ्ग-निवारणाय राष्ट्रिय-परीक्षा-संस्थायाः संस्थागतकरणम् अतीव अनिवार्यं वर्तते। न्यायालयस्य अनुसारम् अस्याः कृते सुरक्षिता आधारभूत-संरचना, समर्पितानि परीक्षा केन्द्राणि, सुदृढा साइबर सुरक्षा-प्रणाली, संस्थागत-दक्षता, अथ च परीक्षा सञ्चालनाय एका स्थायिव्यवस्था आवश्यकी वर्तते। नीट-यूजी-विंशति-षड्विंशतिः प्रश्नपत्र-प्रकटन-प्रसङ्गे याचिकानां श्रवणं कुर्वन् उच्चन्यायालयेन केन्द्रीय-शिक्षा-मन्त्रालयस्य सचिवः आदिष्टः यत् सः राधाकृष्णन्-समित्याः संस्तुतीनां क्रियान्वयनाय स्वीक्रियमाणानां चरणानां विवरण-सहितम् एकं शपथपत्रम् न्यायालये प्रस्तुयात्।

# शिक्षामन्त्री प्रल्हाद-जोशी-महोदयः उच्चशिक्षाविभागस्य वरिष्ठैरधिकारिभिः सह अमिलत्



केन्द्रीयशिक्षामन्त्री प्रल्हाद-जोशी-महोदयः अद्य उच्चशिक्षाविभागस्य वरिष्ठैरधिकारिभिः सह मेलनम् अकरोत्। अस्मिन् उपवेशने श्री-जोशी-महोदयः स्पर्धापरीक्षाणां सज्जतां कुर्वद्भ्यः युवेभ्यः निःशुल्कम् अन्तर्जाल-प्रशिक्षणं (ऑनलाइन-कोचिंग) प्रदातुं प्रधानमन्त्रिणः उपक्रमस्य क्रियान्वयनस्य समीक्षां कृतवान्। श्री-जोशी-महोदयः एकेन सामाजिक-माध्यम-सन्देशेन (सोशल-मीडिया-पोस्ट्) असूचयत् यत् अन्तर्जाल-प्रशिक्षणस्य उद्देश्यम् उच्चगुणवत्तायुक्तां शिक्षणसामग्रीं, विशेषज्ञमार्गदर्शनं, संरचिताः सज्जता-रणनीतीः च देशस्य छात्रेभ्यः प्रापय्य एकस्य सशक्तस्य राष्ट्रियमञ्चस्य निर्माणं वर्तते।

# प्रवर्तन निदेशालयेन दशसु स्थानेषु अन्वेषणं कृतम्



प्रवर्तन निदेशालयेन दशसु स्थानेषु अन्वेषणं कृतम्। मौलाना मोहम्मद्-अली-जौहर-परिसरेण रामपुरस्थेन मोहम्मद्-अली-जौहर-विश्वविद्यालयेन च सम्बद्धे धनशोधन-प्रकरणे उत्तरप्रदेशे, दिल्ली-नगरे, रामपुरे, सहारनपुरे च विभिन्नेषु स्थानेषु प्रवर्तन निदेशालयेन सहसान्वेषणं प्रवर्तितम्। प्रवर्तन निदेशालयेन ज्ञापितं यत् धनशोधन-निवारण अधिनियमस्य, द्यधिक-द्विसहस्रतमे वर्षे प्रवर्तितस्य अधिनियमस्य अन्तर्गतं अन्वेषणं कृतम् इति। इदं अन्वेषणं स्वायत्त-करदातृभिः माध्यमैः सर्वकारीय-अनुबन्ध-निधेः कथित-विचलनस्य, ततः प्राप्तस्य धनस्य विश्वविद्यालयस्य अथवा परिसरस्य कृते सम्पत्तिनिर्माणे कथित-उपयोगस्य च विषये प्रवर्तते। लखनऊ-नगरे स्थितः मौलाना मोहम्मद्-अली जौहर्-परिसरः, यस्य मुख्य-न्यासीरूपेण उत्तरप्रदेशस्य पूर्व-मन्त्रिमण्डलीय-मन्त्री आज़म्-खान इत्येषः परिवारस्य सदस्यैः सह कार्यं निर्वहति, रामपुर-मण्डले मोहम्मद्-अली जौहर्-विश्वविद्यालयं सार्वजनिक-विद्यालयं च प्रचालयति। प्रवर्तन निदेशालयेन विज्ञापितं यत् अन्वेषणस्य प्रमुखम् उद्देश्यम् अपराधजनित-धनस्य उद्घाटनं, वित्तीय-अभिलेखानां अथ प्रलेखानां सङ्ग्रहणं, सर्वकारीय-निधेः उपयोगेन सम्बद्धानां डिजिटल्-साक्ष्याणां प्राप्तिश्च अस्ति।

# कोलम्बिया-देशे भीषण भूकम्पेन मृतानां सङ्ख्या द्वादशाधिक-त्रिशतं यावत् प्रवृद्धा



कोलम्बिया-देशे चत्वारि दशांशोत्तर सप्त मितायां तीव्रतायां भूकम्पेन मृतकानां सङ्ख्या द्वादशाधिक त्रिशतं यावत् वर्धिता, प्रायः एकादशोत्तर षट्शताधिकचतुः सहस्रं यावत् जनाः व्रणिताः, यस्मिन् नवत्यधिकद्विशतं यावत् जनाः अद्यापि लुप्ताः सन्ति इति सूच्यते। राष्ट्रिय-आपद्-सङ्कट-प्रबन्धन विभागः अवदत् यत् प्रायः सप्तसप्तत्यधिक द्विशतं यावत् भवनानि पतितानि, प्रायः त्रिंशत्सहस्रं यावत् गृहाणि क्षतिग्रस्तानि। राष्ट्रिय-अन्ताराष्ट्रिय-अन्वेषण-उद्धार-दलानि भग्नावशेषस्य अधः अद्यापि निबद्धान् लुप्तान् वा जनान् अन्वेष्टुं कार्येषु निमग्नानि सन्ति। कोलम्बिया-देशस्य राष्ट्रपतिना एबेलार्डो डे ला एस्त्रीला इत्यनेन आर्थिक आपत्कालस्य घोषणा कृता, येन सर्वकारः साहाय्यस्य, पुनर्वसनस्य, पुनर्निर्माणस्य च प्रयत्नानां गतिं वर्धयितुं असाधारण-उपायान् कर्तुं समर्थः भविष्यति।

# अमेरिकीयराजदूतेन सर्जियो-गोर-महोदयेन जम्बू-काश्मीरं भारतस्य महत्त्वपूर्णम् अङ्गम् इति कथितम्



भारते अमेरिकीयराजदूतः सर्जियो-गोर-महोदयः केन्द्रशासितप्रदेशं जम्बू-काश्मीरं भारतस्य महत्त्वपूर्णम् अङ्गम् इति उक्तवान्, तथा च अवदत् यत् सुरक्षा-व्यवस्थां सुदृढां कर्तुं केन्द्रसर्वकारेण क्षेत्रीयसर्वकारेण च महत्त्वपूर्णानि पदानि उत्थापितानि सन्ति। श्री-गोर-महोदयः जम्बू-काश्मीरस्य स्वकीयायां प्रथमयात्रायाम् अस्ति। सः मुख्यमन्त्रिणा उमर-अब्दुल्ला-महोदयेन सह तस्य श्रीनगरस्थिते आवासे अमिलत्। सः मुख्यमन्त्रिणा सह जातं मेलनं सकारात्मकम् इति अवर्णयत्, अवदत् च यत् भविष्ये अग्रे गन्तुम् उभयपक्षैः केचन महत्त्वपूर्णविषयाः चिह्निताः सन्ति। जम्बू-काश्मीरार्थम् अमेरिकीय-यात्रानिर्देशिकायाः विषये श्री-गोर-महोदयः अकथयत् यत् यद्यपि अद्य कापि औपचारिकी उद्घोषणा कर्तुं न शक्यते, परन्तु नवदेहल्याः स्थानीयसर्वकारस्य च प्रयासैः सुरक्षायां सुधारः जातः अस्ति, अतः यात्रा-परामर्श सङ्कटस्तरः न्यूनीकर्तव्यः। तेनोक्तं यत् बहवः अमेरिकीयनागरिकाः काश्मीरस्य यात्रां कर्तुम् इच्छिष्यन्ति यतोहि इदम् अतीव सुन्दरं स्थानम् अस्ति। मुख्यमन्त्री उमर-अब्दुल्ला-महोदयः अवदत् यत् मेलनं सकारात्मकम् आसीत् तथा च भारत-अमेरिका-सम्बन्धेषु तेषु क्षेत्रेषु च केन्द्रितम् आसीत् यत्र अमेरिकीय-सरोकाराः जम्बू-काश्मीरेण सह संयोक्तुं शक्यन्ते। सः अकथयत् यत् अस्मिन् मेलने सकारात्मक-सम्पर्के भावि-सहयोगे च बलं दत्तम्।

## क्रीडावार्ता

# भारतेन प्रथम-निकष-स्पर्धायां श्रीलङ्कादलं पञ्चषष्ट्यधिकैकशतं धावनाकैः पराजितम्



पुरुष-क्रिकेट-क्रीडायां गॉल-नगरे द्वयोः निकष-श्रृङ्खलायाः प्रथमायां निकष-क्रीडायां आतिथेय-श्रीलङ्कादलं भारतेन पञ्चषष्ठ्यधिकैकशत-धवनाङ्कैः पराजितम्। इदानीं भारतं श्रृङ्खलायां एकं-शून्यं अङ्केन अग्रे अस्ति।

# बीडब्ल्यूएफ-विश्व-प्रतियोगिताः मिश्रित-द्वन्द्व-स्पर्धायां भारतस्य ध्रुव-कपिला तनीषा-क्रास्टो च पूर्व-तुरीय-अन्तिम-चक्रे प्रविष्टौ




नवदेहल्यां बीडब्ल्यूएफ-पत्रकन्दुक (बैडमिंटन) विश्व-प्रतियोगितायाः मिश्रित-द्वन्द्व-स्पर्धायां भारतस्य ध्रुव-कपिला तनीषा-क्रास्टो च पूर्व-तुरीय-अन्तिम-चक्रे प्रवेशं प्राप्तवन्तौ। तौ मकाऊ-देशस्य लियोन-इओक-चोंग तथा च एनजी-वेन्ग-ची इत्येतौ पराजितवन्तौ। पूर्व-तुरीय-अन्तिम-चक्रे ध्रुवस्य तनीषायाः च स्पर्धा चीन-देशस्य चेन-फाङ्ग-हुई तथा च गुओ-शिन-वा इत्येतयोः युग्मेन सह भविष्यति। सात्विकसाईराज-रङ्कीरेड्डी चिराग-शेट्टी इत्येतयोः युगलम् अपि 'वॉकओवर' (प्रतिद्वन्द्विनः अनुपस्थित्या विजयम्) प्राप्य पूर्व-तुरीय-अन्तिम-चक्रे प्रविष्टम्। भारतस्य लक्ष्य-सेनः, पी.वी. सिन्धुः, आयुष-शेट्टी अन्ये च क्रीडकाः द्वितीये चक्रे स्वकीयान् स्पर्धा-मुकाबिलान् क्रीडिष्यन्ति। पुरुष-एकल-स्पर्धायां लक्ष्य-सेनस्य स्पर्धा अमेरिका-देशस्य गैरेट-टैन-महोदयेन सह भविष्यति, यदा तु आयुष-शेट्टी श्रीलङ्कायाः दुमिन्दु-अबेविक्रमा इत्यनेन सह स्पर्धिष्यते। महिला-एकल-स्पर्धायां द्विवारं प्राप्त-ओलम्पिक-पदका तथा च पूर्व-विश्व-विजेत्री पी.वी. सिन्धुः द्वितीये चक्रे कनाडा-देशस्य वेन-यू-झाङ्ग-महोदयया सह क्रीडिष्यति। तत्रैव उन्नति-हुडा इत्यस्याः स्पर्धा कनाडा-देशस्य मिशेल-ली इत्यनया सह भविष्यति। अपरपक्षे, पुरुष-द्वन्द्व-स्पर्धायां हरिहरन्-आमसकारुनन् तथा च एम.आर. अर्जुन इत्येतयोः स्पर्धा दक्षिण-कोरिया-देशस्य काङ्ग-मिन्-ह्युक तथा च की-डोंग-जू इत्येताभ्यां सह भविष्यति।

# खाद्यपदार्थानाम्, इन्धनस्य अन्य-उत्पादन-सामग्रीणां च वर्धमान-मूल्यैः व्यापक-मुद्रास्फीतेः सङ्कटः - भारतीय-रिज़र्व-बैङ्क-शासकः



भारतीय-रिज़र्व-बैङ्क-शासकः (आरबीआई-गवर्नर) सञ्जय-मल्होत्रा-महोदयः अकथयत् यत् नीतिगत-दरे कस्मिंश्चिदपि परिवर्तने विचारणात् पूर्वं सः मुद्रास्फीतेः स्थितौ स्पष्टतायाः प्रतीक्षाम् इच्छिष्यति। ३ तः ५ अगस्त-पर्यन्तम् आयोजितायाः मौद्रिकनीति-समित्याः (एमपीसी) उपवेशनस्य कार्यवृत्तानुसारं, समित्या सर्वसम्मत्या निरन्तरं चतुर्थवारं 'रेपो'-दरः ५.२५ प्रतिशते अपरिवर्तितः स्थापितः तथा च तटस्थदृष्टिकोणस्य रक्षणाय निर्णयः कृतः।रिज़र्व-बैङ्क-शासकः अवदत् यत् खाद्यपदार्थानाम्, इन्धनस्य, अन्य-उत्पादन-साधनानां च वर्धमान-मूल्यैः व्यापक-मुद्रास्फीतेः आशङ्का वर्तते, किन्तु सम्प्रति एतेषां भाराणां व्यापकतायाः सीमिताः एव सङ्केताः सन्ति। तेन उक्तं यत् निरन्तर-मुद्रास्फीतेः अथवा अनियन्त्रित-मुद्रास्फीति-प्रत्याशानां कस्यापि प्रमाणस्य कृते नीतेः कठोरता आवश्यकी भवितुम् अर्हति।उपशासिका तथा च मौद्रिकनीति-समित्याः सदस्या पूनम-गुप्ता-महोदया अपि वैश्विक-ऋतु-सम्बन्धि-अनिश्चिततानां कारणं प्रस्तूय 'प्रतीक्षां कुरु पश्य च' इति दृष्टिकोणस्य समर्थनम् अकरोत्।
रिज़र्व-बैङ्केन २०२६-२७ वर्षार्थं वास्तविक-सकल-घरेलू-उत्पाद-वृद्धिः (जीडीपी) ६.७ प्रतिशतं तथा च उपभोक्ता-मूल्य-सूचकाङ्क-आधारिता (सीपीआई) मुद्रास्फीतिः ५ प्रतिशतं भवितुम् अनुमानितम्। मौद्रिकनीति-समित्या कथितं यत् भू-राजनैतिक-घटनाक्रमाः, वैश्विक-ऊर्जा-मूल्यानि, वर्षाकालः (मानसून) च प्रमुखाः घटकाः सन्ति येषां पर्यवेक्षणम् आवश्यकम् अस्ति।

# 'युवासङ्गमस्य' सप्तम-चरणाय अन्तर्जाल-पञ्जीकरणस्य अन्तिम-तिथिः वर्धिता


शिक्षा-मन्त्रालयेन सूचितं यत् 'युवासङ्गमस्य' सप्तम-चरणार्थम् अन्तर्जाल-पञ्जीकरणस्य अन्तिमा तिथिः अस्य मासस्य ३१ दिनाङ्क-पर्यन्तं वर्धिता अस्ति। मन्त्रालयः अवदत् यत् अनेन विस्तारणेन देशस्य समस्तेभ्यः योगेभ्यः युवेभ्यः अस्मिन् अद्वितीये युवा-आदान-प्रदान-कार्यक्रमे पञ्जीकरणाय भागग्रहणाय च एकः अतिरिक्तः अवसरः प्राप्स्यते।
पूर्वं 'युवासङ्गम'-सप्तम-चरणाय पञ्जीकरणस्य अन्तिमा तिथिः १८ अगस्त आसीत्। १८ तः ३० वर्ष-वयसः इच्छुकाः युवानः, येषु उच्चशिक्षा-संस्थानां छात्राः, राष्ट्रियसेवा-स्वयंसेवकाः, युवा-व्यावसायिकाः च अन्तर्भवन्ति, ते आधिकारिक-युवासङ्गम-जालपुटेन पञ्जीकरणं कर्तुं शक्नुवन्ति।

# विश्व-छायाचित्रण-दिवसस्य अवसरे सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णव-महोदयेन छायाचित्रकारैः सह सम्भाषणं कृतम्




विश्व-छायाचित्रण-दिवसस्य अवसरे सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णव-महोदयः नवदेहल्यां मन्त्रिमण्डल-वार्तानन्तरं छायाचित्रकारैः सह सम्भाषणम् अकरोत्। श्री-वैष्णव-महोदयः सार्वजनिक-जीवने राष्ट्रिय-घटनानां च महत्त्वपूर्णानां क्षणानां दृश्य-कथा-माध्यमेन सङ्ग्रहणे प्रलेखने च छायाचित्रकाराणां योगदानस्य प्रशंसां कृतवान्। सः छायाचित्रकारैः सह छायाचित्राणि अपि अकारयत् तथा च प्रसारमाध्यम-जगता सह अनौपचारिक-वार्तालाप-माध्यमेन विश्व-छायाचित्रण-दिवसम् आचरितवान्।
प्रतिवर्षम् अगस्त-मासस्य १९ तमे दिनाङ्के छायाचित्रण-कलायाः, शिल्पस्य, प्रभावस्य च उत्सवम् आचरितुं तथा च इतिहासस्य, समाजस्य, महत्त्वपूर्णानां घटनानां च प्रलेखने छायाचित्रकाराणां भूमिकायाः अभिनन्दनार्थं विश्व-छायाचित्रण-दिवसः आचर्यते।

# विज्ञान-तन्त्रज्ञान-मन्त्रालयेन 'आरके-२५१' नाम्ना औषधस्य विषये सूचना प्रदत्ता




विज्ञान-तन्त्रज्ञान-मन्त्रालयेन एकस्य नूतनस्य 'स्मार्ट'-औषधस्य विषये सूचना प्रदत्ता यत् पारम्परिक-रासायनिक-चिकित्सायाः (कीमोथेरेपी) विकल्पः भवितुम् अर्हति। 'आरके-२५१' नामकम् इदम् औषधं स्वस्थ-कोशिकानां हानिम् अकृत्वा केवलं कर्क-कोशिकाः (कैंसर-कोशिकाः) लक्षीकर्तुं निर्मितम् अस्ति।
मन्त्रालयः इमं विचारं साकारीकर्तुं 'विज्ञान-तन्त्रज्ञान-संस्थानस्य' (आईएएसएसटी) अनुसन्धानकर्तॄणां तथा च 'आईआईटी, गुवाहाटी' इत्यस्य तज्ज्ञानां संयुक्त-प्रयासस्य प्रशंसां कृतवान्। मन्त्रालयेन एतदपि सूचितं यत् पूर्व-नैदानिक-अध्ययनेषु 'आरके-२५१' इत्यनेन आक्रामक-त्रिगुण-नकारात्मक-स्तन-कर्क-कोशिकानां (ट्रिपल-नेगेटिव ब्रेस्ट कैंसर) विरुद्धं दृढः प्रभावः प्रदर्शितः, यदा तु स्वस्थ-कोशिकासु अस्य प्रभावः नगण्यः आसीत्।

# गान्धीनगरे 'ब्रिक्स'-युवा-शिखर-सम्मेलनं 'ब्रिक्स'-युवा-परिषदः उपवेशनं च प्रारब्धम्




'ब्रिक्स'-युवा-शिखर-सम्मेलनं तथा च 'ब्रिक्स'-युवा-परिषदः उपवेशनम् गान्धीनगरे केन्द्रीय-युवकार्य-क्रीडा-राज्यमन्त्रिणः रक्षा-खडसे-महोदयायाः गुजरातस्य उपमुख्यमन्त्रिणः हर्ष-सङ्घवी-महोदयस्य च उपस्थितौ प्रारब्धम्।
शिखर-सम्मेलने प्रमुख-प्राथमिकताः, शिक्षा, भविष्यस्य सज्जता, समावेशी-विकासः, पर्यावरण-उत्तरदायित्वं, युवा-सहभागिता च इत्यादिषु विषयेषु चर्चा अभवत्। शिखर-सम्मेलनेन सहैव 'ब्रिक्स'-युवा-परिषदा दीर्घकालिक-संस्थागत-सहयोगं सुदृढं कर्तुं संयुक्त-घोषणापत्रस्य प्रारूपात् 'ब्रिक्स'-युवा-सहयोग-संरचनायाः चोपरि विचार-विमर्शः कृतः।अस्मिन् कार्यक्रमे 'फ्रेंड्स ऑफ माय भारत' जालपुटस्य शुभारम्भः तथा च 'स्वयंसेवा-प्रथानां अङ्कीय-सङ्कलनस्य' अनावरणं कृतम्। अस्मिन् शिखर-सम्मेलने भारतस्य समृद्धां सांस्कृतिक-विविधतां परम्परां च ज्ञातुं प्रतिनिधयः केवडिया-स्थितायाः 'एकता-प्रतिमायाः' (स्टैच्यू ऑफ यूनिटी) दर्शनं करिष्यन्ति।




अशोक दर्द डलहौजी चंबा हिमाचल प्रदेश

# कविया सुण

कविया सुण अपणे उरे परे दिक्ख।
फिरी रचना बिच्च ईदेया लिक्ख।।

भुक्ख मिटी जायै त्रे बुझी जायै।
रस्ते भुल्लेयां ई राह सुझी जायै।।

सुकी जान बगदियां खूनी नदियां।
सुखे ने भरोईयां मिल्लण सदियां।।

बम्ब गोलियां धरती प मुकी जान।
हर चेहरे पुर खिलरी रैह् मुस्कान।।

कोई त्रासदी नी बसदे घरां ई ढायै।
बड्डी मच्छी नी निक्किया ई खायै।।

तेरे शब्दां च चन- तारे टिमटिमान।
नेहरा नह्सी जायै उजाले मुस्कान।।

तेरे शब्दां दी हुंकार ने प्रेम बरणा लग्गै।
नफरतां दा पहाड़ खरणा लग्गै।।

युगां दा मौन तोड़ किच्छ ईदेया रच।
झूठे छा जीत्ति जायै हर जगह सच।।

# हिमाचल-विश्वविद्यालये आरक्षकाणां 'एस. एफ. आई.' कार्यकर्तॄणां च मध्ये सङ्घर्षः, शुल्कवृद्धेः विरोधे रोषप्रदर्शनम्



हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेश-विश्वविद्यालये सम्प्रति कृतायाः शुल्कवृद्धे विरोधे बुधवासरे 'एसएफआई' छात्र-सङ्घटनेन एका महती विरोधयात्रा निष्कासिता। अस्यां विरोधयात्रायां बहुसङ्ख्याकाः छात्राः सम्मिलिताः अभवन् विश्वविद्यालय- प्रशासनस्य च विरुद्धं तीव्रं विरोधं प्राकटयन्।विरोधयात्रा-काले विश्वविद्यालय-परिसरे कञ्चित् कालं यावत् प्रवादपूर्ण-स्थितिः उत्पन्ना। अस्मिन् समये 'एसएफआई' कार्यकर्तॄणाम्, आरक्षकाणां च मध्ये परस्परं सङ्घर्षः अपि जातः। आरक्षण-दलेन स्थितिं नियन्त्रयितुं प्रयासः कृतः। 'एसएफआई' सङ्घटनेन शुल्कवृद्धिः 'छात्रविरोधी निर्णयः' इति प्रतिपाद्य एषः निर्णयः प्रत्याहर्तव्यः इति प्रबलतया याचितम्। सङ्घटनस्य कथनम् अस्ति यत् शुल्कवृद्ध्या छात्रेषु आर्थिक-भारः वर्धिष्यते। प्रदर्शनकाले छात्रैः शुल्कवृद्धेः विरुद्धं तीव्राः उद्घोषाः कृताः सर्वकारश्च एतं निर्णयं शीघ्रमेव प्रतिनिवर्तयितुं याचितः।

# मुख्यमन्त्री सुक्खू-प्रतिभासिंह च देहलीं प्रस्थितौ; राजधान्यां काङ्ग्रेस-कार्यकारिणी- समित्याः (CWC) उपवेशने सम्मिलितौ भविष्यतः

हिमसंस्कृतवार्ताः- शिमला।देहल्यां समायोज्यमाने काङ्ग्रेस- कार्यकारिणी- समित्याः उपवेशने भागं ग्रहीतुं मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः भौमवासरे देहलीं प्रति प्रस्थितवान्। कार्यकारिणी-समित्याः सदस्या पूर्व-संसद-सदस्या च प्रतिभासिंहवर्या अपि अस्मिन् उपवेशने भागं स्वीकर्तुं गता अस्ति। उपवेशनस्य मुख्यकार्यसूची 'छात्रगर्जनम्' कार्यक्रमस्य विस्तारः, आगामि-विधानसभा- निर्वाचनानां कृते कार्यनीति-निर्माणं वर्तते। यद्यपि मुख्यमन्त्रिणः अस्मिन् उपवेशने सहभागितया प्रदेशे प्रस्तावितस्य मन्त्रिमण्डल-विस्तारस्य विषये अपि चर्चा सम्भाव्यते। एतदतिरिच्य सङ्घटनात्मक- गतिविधीनां प्रदेशेन सम्बद्धानाम् अन्यासां राजनैतिकवार्तानां विषये अपि प्रदेशस्य उभौ नेतृवृन्दौ अस्मिन् उपवेशने स्व-पक्षं प्रस्तोतुं शक्नुतः।

# प्रतिकूल- ऋतु- कारणात् प्रियङ्कागान्धी- वर्यायाः प्रवासः निरस्तः

उल्लेखनीयं वर्तते यत् काङ्ग्रेस- राष्ट्रिय-महासचिवायाः संसद-सदस्यायाश्च प्रियङ्कागान्धी-वाड्रावर्यायाः मण्डी-मण्डलस्य प्रवासः प्रस्तावितः आसीत्, येन मुख्यमन्त्रिणः मण्डीतः एव देहलीं प्रति गमनस्य कार्यक्रमः निर्धारितः आसीत्। किन्तु प्रतिकूल-वातावरणस्य कारणात् प्रियङ्कागान्धी-वर्यायाः प्रवासः निरस्तः जातः। अतः भौमवासरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू- महोदयः शिमलातः एव देहलीं प्रति प्रस्थितवान्।

# ताजमोहम्मद-प्रकरण-सहितेषु सम्बद्धविषयेषु प्रशासनिक-विभागाः एव ग्रहीष्यन्ति निर्णयान्; निर्देशाः प्रसारिताः

**हिमसंस्कृतवार्ताः- शिमला।** प्रदेशे कर्मचारिणां नियुक्तौ, सेवानियमेषु, वित्तीयलाभेषु च अनुबन्ध-सेवा-अवधेः संयोजनेन सम्बद्धेषु प्रकरणेषु अधुना 'फील्ड' स्तरस्य अधिकारिणः स्वतन्त्रतया निर्णयं ग्रहीतुं न शक्यन्ति। राज्य-सर्वकारेण प्रशासनिकम् आदेशं प्रसार्य स्पष्टीकृतं यत् ताजमोहम्मद-प्रकरणस्य एतेन सह सम्बद्धानां न्यायिकनिर्णयानाम् आधारेण समागतानां सर्वेषां प्रकरणानां परीक्षणं निर्णयाश्च सम्बद्ध- प्रशासनिक- विभागस्य स्तर एव सचिवालये विधास्यन्ते। बुधवासरे कार्मिकविभागेन प्रसारितेषु निर्देशेषु प्रोक्तं यत् 'हिमाचलप्रदेश- भर्ती- तथा- सर्वकारीय- कर्मचारिणां सेवाशर्त- अधिनियम- २०२४' इत्येतत् हिमाचलप्रदेश-उच्च-न्यायालयेन २५ अप्रैल २०२६ दिनाङ्के निरस्तीकृतम् आसीत्। अस्य विरुद्धं राज्य-सर्वकारेण सर्वोच्च-न्यायालये प्रवेशिता 'विशेषानुमति-याचिका' अपि २९ जुलाई २०२६ दिनाङ्के निरस्ता संजाता। एवं सति न्यायालस्य निर्णयानां सन्दर्भे प्रशासनिकव्यवस्थां नूतनरूपेण सञ्चालयितुं निर्देशाः दत्ताः सन्ति।

**निर्णयानां वैधानिकप्रभावम् अवलोक्य एका समाना नीतिः**

सर्वकारस्य अनुसारं गतेषु वर्षेषु ताजमोहम्मद-प्रकरणस्य, एतेन सह सम्बद्धानां निर्णयानाम् आधारेण विभागेषु बहुसङ्ख्याकानि प्रकरणानि आवेदनानि च कृतानि। बहुषु प्रकरणेषु कर्मचारिभिः पुरातन-न्यायिक-निर्णयानाम् उल्लेखं कृत्वा लाभानां याचना कृता अस्ति। अस्यैव आधारेण सर्वकारेण नूतना व्यवस्था प्रवर्तिता, येन विभागेषु स्तरेषु च क्रियमाणेभ्यः निर्णयेभ्यः उत्पन्नाः विसङ्गतयः रोद्धु शक्यन्ते। कार्मिकविभागेन स्पष्टीकृतं यत् 'देविन्द्रकुमारः बनाम राज्यसर्वकारः' प्रकरणे उच्च-न्यायालयस्य निर्णयः पूर्वं हिमाचलप्रदेश-प्रशासनिक- अधिकरणेन दत्ते 'लेखरामप्रकरणे', पश्चात् 'ताजमोहम्मद-प्रकरणे' उच्चन्यायालयस्य खण्डपीठस्य निर्णयेन सह सम्बद्धः अस्ति।




एतेषां निर्णयानां वैधानिकप्रभावं दृष्ट्वा सर्वकारेण सर्वप्रकरणेषु एका समाना नीतिः स्वीकर्तुं निर्णयः कृतः।

**उपायुक्तानां, विभागाध्यक्षाणां, निगमानां च कृते अपि निर्देशाः**

अयम् आदेशः केवलं सचिवालय-स्तरं यावत् सीमितः नास्ति। सर्वेभ्यः प्रशासनिक-सचिवेभ्यः, मण्डलायुक्तेभ्यः, उपायुक्तेभ्यः, विभागाध्यक्षेभ्यः, सार्वजनिक-उपक्रमेभ्यः, निगमेभ्यः, मण्डलेभ्यः, विश्वविद्यालयानां प्रमुखाभ्यश्च निर्देशाः प्रसारिताः। सर्वकारेण उक्तं यत् ताजमोहम्मद-निर्णयस्य आधारेण समागते कस्मिन्नपि विषये 'फील्ड'-स्तरे निर्णयग्रहणात् पूर्वं सम्बद्ध- प्रशासनिकविभागस्य अनुमतिः अनिवार्या भविष्यति। सर्वे विभागाः सुनिश्चितं कर्तुम् उक्ताः यत् अयम् आदेशः 'आहरण-संवितरण-अधिकारिणः' सहितान् सर्वान् सम्बद्ध-अधिकारिणः यावत् प्रापणीयो भवेत्। अस्याः व्यवस्थायाः उद्देश्यं न्यायालयीय-आदेशानां व्याख्यायां त तेषाम् आधारे कर्मचारिभ्यः लाभ-प्रदान-प्रकरणेषु एकरूपतां रक्षितुम् अस्ति, येन भविष्ये कस्यापि प्रकारस्य प्रशासनिकः वैधानिकः वा विवादः नोत्पद्येत।

# हर्षवर्धनचौहानः अवदत्- खादी- ग्रामोद्योग- मण्डलस्य कर्मचारिणां भविष्यति युक्तिकरणम्



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश- खादी- ग्रामोद्योग- मण्डले कर्मचारिणां युक्तिकरणं विधास्यते। उद्योगमन्त्री हर्षवर्धनचौहानः अधिकारिभ्यः वास्तविक-कार्यात्मक- आवश्यकतानुसारं कर्मचारिणां युक्तिकरणं कर्तुं निर्देशान् दत्तवान्, येन उपलब्ध-श्रमशक्तेः अधिकतमः उपयोगः भवेत् तथा च मण्डलस्य प्रशासनिक-सञ्चालन-क्षमता च वर्धेत। मण्डलेन सामान्यजनेषु स्व-उत्पादानां प्रसारं वर्धयितुं विक्रयणं च संवर्धयितुं बलं दत्तम्। उद्योगमन्त्रिणः अध्यक्षतायां बुधवासरे मण्डलस्य निदेशक-मण्डलस्य २४८ तमम् उपवेशनं सम्पन्नम्। अस्मिन् विज्ञापितं यत् २०२५-२६ वर्षे मण्डलेन विविधानाम् उत्पादानां ५४.८४ कोटि- रूप्यकाणां विक्रयणं पञ्जीकृतम्। एतत् २०२४-२५ वर्षस्य ३९.१९ कोटि-रूप्यकाणां विक्रयणस्य अपेक्षया प्रायः ३९ प्रतिशतम् अधिकम् अस्ति। अस्मात् विक्रयणात् मण्डलाय प्रायः ४.५० कोटि- रूप्यकाणाम् आयः जातः।

**रिक्त-भवनानि भाटकेन दीयन्ते-**

उपवेशने मण्डलस्य सम्पत्तीनां समुचित-उपयोगाय अपि निर्णयः स्वीकृतः। काङ्गड़ा-परिसरे रिक्तानां भवनानां विक्रयण-केन्द्राणां च साकम् उदयपुर, होली, पूहस्थितानि ऊर्ण-कर्तन-केन्द्राणि भाटकेन दातुम् अनुमतिः प्रदत्ता। अनेन मण्डलाय अतिरिक्तराजस्वं प्राप्स्यते मण्डलं च स्वावलम्बि विधातुं साहाय्यं लप्स्यते। वित्तीयवर्षे २०२६-२७ मध्ये मण्डलेन विपणन-व्यावसायिक- गतिविधिभिः उत्पादानां विक्रयणाय ११२ कोटि-रूप्यकाणां लक्ष्यं निर्धारितम् अस्ति। जुलाई २०२६ पर्यन्तमेव १९.७१ कोटि-रूप्यकाणां विक्रयण-लक्ष्यं सम्प्राप्तम्। मन्त्रिणा मण्डलस्य विक्रयणे सञ्जातायाः वृद्धेः प्रशंसां कुर्वता गतिविधिभ्यः सुदृढताम् आनेतुं निर्देशाः दत्ताः। अस्मिन् उपवेशने वित्त-विभागस्य विशेष-सचिवः विजयवर्धनः, उद्योग-विभागस्य विशेष-सचिवः सुनीलशर्मा, मण्डलस्य मुख्य-कार्यकारी-अधिकारी जितेन्द्रकँवरः सहिताः अन्ये वरिष्ठाः अधिकारिणः उपस्थिताः आसन्।

# औषधविज्ञानात् सुरक्षितोपचारं यावत्: पाटलपुत्रस्थ-अखिलभारतीय-आयुर्विज्ञान-संस्थाने (AIIMS) राष्ट्रिय-औषधविज्ञान-दिवसस्य समायोजनम्



**हिमसंस्कृतवार्ता, पाटलीपुत्रम् : १९/०८/२०२६ राघव नाथ झा।** औषधं केवलम् उपचारस्य साधनं न, अपि तु तस्य समुचितचयनस्य, यथार्थमात्रायाः, सुरक्षितप्रयोगस्य च दायित्वमपि वर्तते। अनेन चिन्तनेन अखिलभारतीय-आयुर्विज्ञान-संस्थानस्य (एम्स), पटना इत्यस्य भेषजगुणविज्ञानविभागेन (फार्माकोलॉजी) सोमवासरे राष्ट्रिय-भेषजगुणविज्ञान-दिवसः २०२६ आचरितः। अस्मिन् कार्यक्रमे भारतीयभेषजगुणविज्ञानस्य जनकस्य सर् (कर्नल) रामनाथ-चोपड़ा-महोदयस्य अवदानं संस्मृत्य आधुनिकचिकित्सायां भेषजगुणविज्ञानस्य परिवर्तमानायाः भूमिकायाः उपरि मन्थनं कृतम्।

कार्यक्रमस्य मुख्यातिथयः एम्स-पटना-संस्थानस्य कार्यपालकनिदेशकाः तथा च मुख्यकार्यकारी-अधिकारिणः (CEO) प्रो. (ब्रिगेडियर) डॉ. राजू अग्रवाल महोदयाः औषधविज्ञानस्य महत्त्वं रेखाङ्कितवन्तः। पाटलीपुत्र-आयुर्विज्ञान-महाविद्यालयस्य (PMCH) भेषजगुणविज्ञानविभागस्य पूर्वाचार्या तथा विभागाध्यक्षा प्रो. (डॉ.) इन्दुसिन्हा विशिष्टातिथिरूपेण कार्यक्रमे उपस्थिता आसीत्। कार्यक्रमाद्यावसरः भारतीयभेषजगुणविज्ञानस्य विकासेन तथा सर्-रामनाथ-चोपड़ा-महोदयस्य योगदानस्य स्मरणेन अभवत्। प्रो. (डॉ.) हरिहरदीक्षितः "सर् (कर्नल) रामनाथ-चोपड़ा-महोदयस्य जीवनम् अवदानं च - भारतीय-भेषजगुणविज्ञानस्य जनकः" इति विषये व्याख्यानं दत्त्वा तेषां दूरदृष्टियुक्तानां कार्याणां तथा भारतवर्षे अस्य विज्ञानस्य सुदृढभित्तिस्थापने तेषां भूमिकां प्रकाशितवान्। वैज्ञानिकसत्रे प्रो. (डॉ.) एन. आर. बिस्वास महोदयेन "क्लिनिकल्-शुश्रूषायां प्रिसिजन-मेडिसिन् (सटीकचिकित्सा)" इति विषये व्याख्यानं दत्तम्। सः न्यवेदयत् यत् आधुनिकचिकित्सा तीव्रगत्या तादृशम् उपचारं प्रति अग्रेसरीभवति यत्र रोगिणः वैयक्तिकावश्यकताः परिस्थितयश्च अवलोक्य चिकित्सायाः चयनं विधीयते। अत्र औषधानां तेषां प्रभावस्य च अवबोधने भेषजगुणविज्ञानस्य भूमिका अत्यन्तमहत्त्वपूर्णा वर्तते।

अपरस्मिन् पक्षे प्रो. (डॉ.) रानी इन्दिरा सिन्हा "औषधविज्ञानविदः: आगामी मार्गः" इति विषये स्वविचारान् प्रस्तुतवती। सा अवदत् यत् परिवर्तमाने चिकित्सापरिदृश्ये औषधविज्ञानविदां भूमिका केवलं शिक्षया अनुसन्धानेन च सीमिता न भूत्वा सुरक्षिताषधप्रयोगं, नैदानिकनिर्णयम्, आतुरकेन्द्रितोपचारं (पेशेण्ट् सेण्ट्रिक्) च प्रति प्रसरति।

कार्यक्रमस्यास्य सञ्चालनं डॉ. प्रमोदकुमारमांझी-महोदयस्य (अतिरिक्त-आचार्यः विभागाध्यक्षश्च, भेषजगुणविज्ञानविभागः, एम्स-पटना) नेतृत्वे अभवत्। वैज्ञानिकव्याख्यानानन्तरम् एकस्याः परस्परसंवादचर्चायाः (इण्टरैक्टिव्) आयोजनं कृतम्, यस्यां प्रतिभागिनः औषधविज्ञानक्षेत्रे उद्भवन्तीनाम् आव्हानानां, नवीनानां सम्भावनानां, भविष्यत्कालीनभूमिकायाश्च उपरि स्वमतानि प्राकटयन्। राष्ट्रिय-औषधविज्ञान-दिवसः २०२६ अयम् एतं सन्देशं दत्तवान् यत् आधुनिकचिकित्सायां श्रेष्ठोपचारस्य आधारशिला केवलं नूतनौषधानाम् अन्वेषणं नास्ति, अपि तु तेषां यथार्थः, सुरक्षितः, वैज्ञानिकश्च उपयोगः अपि अस्ति। सटीकचिकित्सातः (प्रिसिजन्-मेडिसिन्) आरभ्य रोगिणां सुरक्षां यावत्, भेषजगुणविज्ञानम् अद्य चिकित्साविज्ञानस्य भविष्यं स्वरूपयितुं महतीं भूमिकां निर्वहति। एम्स-पटना-संस्थानस्य एतत् आयोजनम् औषधविज्ञाने शिक्षणम्, अनुसन्धानम्, नूतनोन्मेषं (नवाचारं), रोगिकेन्द्रित-नैदानिकसेवाश्च सुदृढीकर्तुं दिशि एकं प्रशंसनीयं पदक्षेपम् आसीत्।

# श्रावणीमेलके डीएवीपब्लिक स्कूल, बरारी- भागलपुरस्य छात्रैः गङ्गास्वच्छताभियाने सहभागिता कृता




**हिमसंस्कृतवार्ताः:- डॉ. विमलेश झा, भागलपुरं, बिहारम्।** बिहारराज्यस्य सुलतानगञ्जनगरे प्रवर्तमानस्य पवित्रस्य श्रावणीमेलकस्य अवसरे डीएवीपब्लिक स्कूल, बरारी, भागलपुरनगरस्य नवम- दशमकक्षयोः चत्वारिंशत् छात्राः 'नमामि गङ्गे' इत्यन्तर्गतं गङ्गास्वच्छताभियाने उत्साहपूर्वकं भागं गृहीतवन्तः। छात्रैः गङ्गास्वच्छतायाः, पर्यावरणसंरक्षणस्य च विषये जनजागरणमपि कृतम्। सर्वे छात्राः बसयानेन विद्यालयात् सुलतानगञ्जनगरं प्राप्तवन्तः। तत्र नमामि गङ्गे-घट्टे, अजगैबीनाथधामक्षेत्रे आयोजिते स्वच्छताकार्यक्रमे ते सहभागिनः अभवन्। छात्रैः शिक्षक-शिक्षिकाभिः सह मार्जनीं स्वीकृत्य घाटपरिसरस्य स्वच्छता कृता तथा जनसामान्यं गङ्गायाः स्वच्छतां प्रति जागरूकं कृतम्।

कार्यक्रमस्य प्रभारी श्रीमहादेवप्रसादः स्वसम्बोधने अवदत्- "गङ्गास्वच्छता अस्माकं प्रमुखं लक्ष्यम् अस्ति। जलस्य स्वच्छता तथा जलस्य सुरक्षा उभे कार्ये अस्माभिः निष्ठया करणीये।"

विद्यालयस्य शिक्षकः डॉ. विमलेश झा अवदत्- "गङ्गास्नानस्य अवसरे अस्माभिः तैलादीनां रासायनिकद्रव्याणां प्रयोगः न करणीयः। अपशिष्टपूजासामग्रीणाम्, अन्येषाम् अपशिष्टपदार्थानां गङ्गायां विसर्जनं न करणीयम्। यत्र कुत्रापि मार्गेषु जलनलिकाभ्यः अनावश्यकं जलं प्रवहति, तस्य निरोधाय अपि सर्वैः प्रयासः करणीयः। गङ्गा अस्माकं सांस्कृतिक-आध्यात्मिक- जीवनस्य आधारः अस्ति; अतः तस्याः संरक्षणं सर्वेषां कर्तव्यम् अस्ति।" शिक्षिका पल्लवीवर्या अवदत्- "जनजागरणेन एव स्थायिस्वच्छता सम्भवति। यदि प्रत्येकं नागरिकः गङ्गास्वच्छतां स्वदायित्वं मन्यते, तर्हि गङ्गा निश्चयेन निर्मला भवितुम् अर्हति।"

अस्मिन् कार्यक्रमे विद्यालयस्य छात्राः आयाति सिंह, शुभाङ्गी प्रिया, रीतिका शेखर, आयुषकुमारसिंह इत्यादयः अपि स्वविचारान् प्रस्तुतवन्तः। ते गङ्गायाः स्वच्छतां, जलसंरक्षणं, पर्यावरणरक्षणं च प्रति स्वप्रतिबद्धतां प्रकटितवन्तः। स्वच्छताभियानस्य अन्ते सर्वैः छात्रैः शिक्षक-शिक्षिकाभिः च नमामि गङ्गे-घट्टक्षेत्रे स्वच्छताकार्यं कृत्वा जनसामान्यं स्वच्छतायाः महत्त्वं प्रति जागरूकं कृतम्। विद्यालयस्य शिक्षकौ सुजीतकुमारमण्डलः, अभिनवकुमारः अपि कार्यक्रमे सक्रियतया भागं गृहीतवन्तौ। सम्पूर्णः यात्राकार्यक्रमः विद्यालयस्य प्राचार्यः सह सहायक-क्षेत्रीयाधिकारी अनिलकुमारमहोदयस्य मार्गदर्शने सफलतया सम्पन्नः अभवत्। कार्यक्रमेन छात्रेषु गङ्गासंरक्षणस्य, पर्यावरणरक्षणस्य तथा सामाजिकदायित्वस्य भावनायाः विकासः अभवत्।

# कृषिक्षेत्राय गतिं प्रदातुं बिहारसर्वकारस्य त्रयः महत्तमाः निर्णयाः-: अल्पब्याजेन ऋणम्, उर्वरकैः सह अन्यवस्तूनां बलात् योजने (टैंगिंग्-मध्ये) प्रतिबन्धः, अद्य च पाटलपुत्रे समायोज्यते कृषकाणां महामन्थनम्





हिमसंस्कृतवार्ता। पाटलीपुत्रम् राघवनाथ झा
बिहारराज्ये कृषकाणाम् आर्थिकदृढीकरणाय, उर्वरकवितरणव्यवस्थायां पारदर्शकतायाः संस्थापनाय, कृषिक्षेत्रं च उद्योगाभिमुखं विधातुं कृषिविभागेन त्रयः प्रमुखाः निर्णयाः स्वीकृताः। बुधवासरे राज्यस्य कृषिमन्त्री विजयकुमारसिंहः विभागस्य एतासां महत्त्वपूर्णानां योजनानां विस्तृतं विवरणं प्रादात्।

**१. त्रि-लक्ष(₹३,००,०००)रूप्यकाणां कृष्यृणे १% अतिरिक्त-ब्याजानुदानम्, नाबार्ड-संस्थया सह सन्धिः**

कृषकेभ्यः सुलभम् अल्पव्ययं च सांस्थानिकमृणं प्रदातुं राज्यसर्वकारेण स्वकीययोजनातः १% अतिरिक्त-ब्याजानुदानं दातुं निर्णयः कृतः। २०२६-२७ वित्तवर्षाय पञ्चशतलक्ष(₹५ कोटि)रूप्यकाणां धनराशिं स्वीकुर्वता कृषिविभागेन नाबार्ड-संस्थया सह सहमतिपत्रे (MoU) हस्ताक्षरं कृतम्।

**लाभार्थिनः-:** वाणिज्यिक-ग्रामीण-सहकारी-कोषेभ्यः ३ लक्षरूप्यकाणि यावत् शस्यऋणम्, केसीसी (KCC), अल्पकालिक-कृषिऋणं वा स्वीकुर्वाणाः सर्वे कृषकाः, अर्धसस्यग्राहिणः (बटाईदार), मौखिकाधमर्णाः (पट्टेदार), संयुक्तदायित्वसमूहानां (JLG) सदस्याश्च।

**प्रतिबन्धः-:** निर्धारितसमयान्तर्गतम् ऋणपरिशोधनं कुर्वन्तः कृषकाः एव अस्य लाभं प्राप्स्यन्ति। केन्द्रसर्वकारस्य ३% अनुदानेन सह राज्यस्य १% अतिरिक्तलाभेन आहत्य ब्याजभारः अत्यल्पः भविष्यति।

**२. उर्वरकैः सह 'जिंक-जाइम्' इत्यादीनां बलात् योजने पूर्णप्रतिबन्धः, नियमोल्लङ्घनकर्त्र्यः संस्थाः 'कृष्णसूचौ' (ब्लैकलिस्ट्) स्थापयिष्यन्ते**

उर्वरकवितरणे पारदर्शकतायै कृष्णविपणनं (कालाबाजारी) च रोद्धुं कृषिमन्त्रिणा दृढः पन्थाः आश्रितः। संस्थाभ्यः विक्रेतृभ्यश्च १५ दिनाभ्यन्तरे व्यवस्थायाः शोधनाय चेतावनी दत्ता।

बलात्-विक्रये कठोरकार्याचरणम्: यूरिया अथवा डीएपी-इत्यादिभिः सह बलात् जिंक अथवा अन्यानि उत्पादानि विक्रीणतीनां संस्थानाम् उपरि वैधानिककार्याचरणं कृत्वा ताः 'कृष्णसूचौ' स्थापयिष्यन्ते।

नवीनानुज्ञापत्रव्यवस्था (लाइसेन्स्): आपूर्तिं सुचारुरूपेण चालयितुं सक्रियेभ्यः सूक्ष्मविक्रेतृभ्यः (रिटेलर्) थोकविक्रेतृणां (होलसेलर्) तथा थोकविक्रेतृभ्यः सूक्ष्मविक्रेतृणाम् अनुज्ञापत्राणि प्रदास्यन्ते, निष्क्रियाणां विक्रेतृणाम् अनुज्ञापत्राणि च निरस्तीक्रियन्ते।

पर्याप्तः सञ्चयः: राज्ये ६.७३ लक्ष-मीट्रिक-टन-परिमितस्य यूरिया-उर्वरकस्य अपेक्षया ७.३२ लक्ष-मीट्रिक-टन-परिमितः सञ्चयः उपलभ्यते। डीएपी (१.२५ लक्ष-मीट्रिक-टन) एनपीके (१.५९ लक्ष-मीट्रिक-टन) इत्येतयोः अपि पर्याप्तः भण्डारः वर्तते।

**३. बामेती-संस्थायाम् अद्य 'कृषिजनकल्याणसंवादः', मुख्योऽतिथिः भविष्यति केन्द्रीयमन्त्री शिवराजसिंहचौहानः**

कृषकाणां, महिला-उद्यमिनां, युवानां, कृषिकर्मकराणां च कल्याणाय अगस्तमासस्य विंशतितमे (२०) दिनाङ्के पाटलपुत्रस्य बामेती-परिसरे 'कृषिजनकल्याणसंवादः' आयोज्यते।

**मुख्यातिथिः-:** केन्द्रीय-कृषि-एवं-कृषककल्याण-तथा-ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः।

**उद्देश्यम्-:** 'प्रकृतिप्रतिभायाः सम्मानं - राष्ट्रसमाजस्य चोत्थानम्' इति ध्येयवाक्यम् आधारीकृत्य आयोजिते अस्मिन् संवादे संङ्गणकीय-कृषिः (डिजिटल-कृषिः), आधुनिकी तन्त्रविद्या, महिलौद्यमिता, शस्यसंस्करणम्, युवाभ्यः स्वरोजगारस्य अवसराश्च इति विषयेषु गभीरं मन्थनं भविष्यति।कृषिमन्त्रिणः वक्तव्यम्: "अस्माकं लक्ष्यं कृषकान् केवलं शस्योत्पादकत्वेन न स्थापयित्वा तान् आत्मनिर्भरान् कृष्यार्थव्यवस्थायाः सशक्तभागिनश्च विधातुम् अस्ति। अल्पब्याजऋणेन, पारदर्शि-उर्वरकवितरणेन, आधुनिकतन्त्रज्ञानेन च बिहारस्य कृषिव्यवस्था नवां गतिं प्राप्स्यति।" — विजयकुमारसिंहः, कृषिमन्त्री, बिहारसर्वकारः

# जनतया सह साक्षात् संवादः तेषां समस्यानां च त्वरितं समाधानम् अस्माकं प्राथमिकता - निशान्तः

- **जनश्रवणे स्वास्थ्यमन्त्री निशान्तः अशृणोत् आवेदकानां समस्याः, अधिकारिभ्यः त्वरितकार्याचरणाय प्रादात् निर्देशान्**
- **परिवहनमन्त्री दामोदररावतः अपि अशृणोत् विभागीयसमस्याः**



**पाटलिपुत्रम् पाटलीपुत्रम् : १९/०८/२०२६ राघव नाथ झा।** बुधवासरे जद(यू)-प्रदेशकार्यालये, पाटलीपुत्रे आयोजिते 'जनश्रवण'-कार्यक्रमे (जनसुनवाई) स्वास्थ्यमन्त्री निशान्तः प्रदेशस्य विभिन्नेभ्यः मण्डलेभ्यः (जनपदेभ्यः) बहुसंख्यायां समागतानाम् आवेदकानां समस्याः अभियोगान् (शिकायत) च साक्षात् सम्भाष्य गम्भीरतया अशृणोत्। सः प्राप्तानाम् आवेदनानाम् उपरि शीघ्रकार्याचरणं सुनिश्चितं कर्तुं घटनास्थलादेव दूरभाषमाध्यमेन सम्बद्धेभ्यः अधिकारिभ्यः आवश्यकान् दिशानिर्देशान् दत्तवान्।

अस्मिन् अवसरे परिवहनमन्त्री दामोदररावतः अपि स्वविभागेन सम्बद्धानां विषयाणां श्रवणं कृत्वा तेषां शीघ्रसमाधानाय आवश्यकं पदक्षेपम् अकरोत्। अस्मिन् प्रसङ्गे विधानपरिषदि सत्तापक्षस्य मुख्यसचेतकः सञ्जयकुमारसिंहः (उर्फ गान्धी जी) तथा प्रदेशमहासचिवः सह-मुख्यालयप्रभारी शम्भुकुशवाहा च उपस्थिताः आसन्।

जनश्रवणे समुपस्थिताः आवेदकाः समस्यानां समाधानाय मन्त्रिद्वयस्य तत्परतायाः भूरिशः प्रशंसां कृतवन्तः। ते जद(यू)-प्रदेशकार्यालये प्रतिसोमवासरतः शुक्रवारं यावत् प्रचलन्तं जनश्रवणकार्यक्रमं सामान्यजनानां समस्यानां निवारणाय एकं प्रशंसनीयं पदक्षेपम् इति अवदन्।

अस्मिन् अन्तरे निशान्तः जनकल्याणं प्रति स्वां कटिबद्धतां प्रकटयन् उक्तवान् यत् जनश्रवणकार्यक्रमस्य माध्यमेन जनतया सह साक्षात् संवादस्थापनं, तेषां वचनश्रवणं, समस्यानां च समाधाननिश्चयनम् अस्माकं सर्वोच्चा प्राथमिकता अस्ति। सः अपि अवदत् यत् राज्यस्य स्वास्थ्यसेवाः निरन्तरं सुदृढाः, प्रभावपूर्णाः, उत्तरदायिन्यश्च विधातुं विभागात् सततं दृढपदक्षेपाः क्रियमाणाः सन्ति।

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
प्रथमा वार्ता समुद्रकूर्माणां शावकान् अधिकृत्य अस्ति। समुद्रतटप्रदेशे रात्रौ कृत्रिम-प्रकाशेन ते भ्रान्ताः। तैः शावकैः समुद्रं त्यक्त्वा अतिथिशाला प्रविष्टा। अन्ते रक्षकैः ते पुनः समुद्रं नीताः।

**काव्या-** अहो! अतिथिशालायां कूर्माणाम् आगमनम् अतीव आश्चर्यकरम्। इदानीं द्वितीया वार्ता श्रूयताम्। अन्तरिक्षे एकेन कृष्णविवरेण एका विशाला तारा भुक्ता। वैज्ञानिकाः तस्मै कृष्णविवराय 'शीघ्रभ्रशा' इति नाम दत्तवन्तः सन्ति। तस्याः तारायाः कश्चित् भागः एव अवशिष्टः।

**नन्दिनी-** कृष्णविवरेण तारायाः भक्षणं भयंकरं खलु! तृतीया वार्ता अतीव हास्यजनका अस्ति। मार्गे एकेन चालकेन यानं वेगेन चालितम्। आरक्षकैः सः पृष्टः। तेन उक्तम् यत् उदर-पीडायाः कारणात् वेगेन आपणस्य शौचालयः अन्विष्टः। सः धावन-स्पर्धाम् न कृतवान् अस्ति।

**काव्या-** हा हा! चालकेन सम्यक् कारणं दत्तम्। अन्तिमा वार्ता विज्ञान-सम्बद्धा अस्ति। अन्तरिक्षावकरं दूरीकर्तुं वैज्ञानिकैः नूतनाः उपग्रहाः निर्मिताः। तेषु उपग्रहेषु गृहगोधिकायाः पादवत् आवरणं योजितम्। तेन आवरणेन नष्ट-यन्त्राणि धृतानि। ततः तानि यन्त्राणि वायुमण्डले दग्धानि।

**नन्दिनी-** अहो! गृहगोधिकायाः साहाय्येन अन्तरिक्षस्य स्वच्छता कृता इति अतीव उत्तमम्। अद्यतनस्य वार्ता- कार्यक्रमस्य अत्रैव समापनं कृतम्। धन्यवादाः काव्ये। ईदरधीरजः, हिमसंस्कृतवार्ता

# किमस्ति यन्न दृश्यते सखेऽत्र दूरभाषके



पलं प्रपीड्यते मनो विलोक्य दूरभाषके,
क्षणान्तरे सुखानुभूतिरस्ति दूरभाषके
सुखासुखं क्रमेण भाव्यतेऽत्र दूरभाषके
सखे!शुभाशुभं समस्तमस्ति दूरभाषके।।१

अभीष्टदृश्यदर्शनानि सन्ति दूरभाषके,
सुदूरलभ्यवस्तुजातमानयेत् समीपके।
विदेशवर्तिना समं लपन्ति दूरभाषके,
सुखाद्यभोजनादिकं सुलभ्यमत्र यन्त्रके।।२

यशस्विता सुलभ्यते जनैश्च दूरभाषके,
चरित्रहानिरप्यहो! भवेच्च दूरभाषके
सुहृत्समागमाः भवेयुरत्र दूरभाषके।
प्रवञ्चना विधीयते तदत्र दूरभाषके।।३

कथाप्रसङ्गसङ्गता सुतुष्टताथ रुष्टता,
मुदान्विताः रुषान्विताः
समस्तकथ्यभावनाः।
तथान्यसूचनाः भवन्ति यत्र दूरभाषके,
विवेचनं न शक्यते किमस्ति दूरभाषके।। ४

सुकर्मसंरताः सुकर्मिणश्च दूरभाषके,
कुकर्मसंरताः कुकर्मिणश्च दूरभाषके।
तपोधनाः सुपुण्यशालिनोऽपि दूरभाषके,
समे सहैव सङ्गताः मिलन्ति दूरभाषके।।५

विवाहमन्त्रणा च शोकसूचनापि यन्त्रके,
कुलस्य वर्धनादिकं च ज्ञाप्यते सुयन्त्रके।
रुजानिपीडितेन सूच्यते च दूरभाषके,
किमस्ति यन्न दृश्यते सखेऽत्र दूरभाषके।।६

स्वयौवनं हि यौवतेन हृयतेऽत्र यन्त्रके,
न शान्तिरस्ति मानसे विलोकनेन यन्त्रके।
ह्यमूल्यकालयापनं मुधास्ति दूरभाषके,
शनैः शनैः गतं सुजीवनं हि दूरभाषके।।७

दृगस्ति दूरभाषके वदन्ति दूरभाषके,
चलन्ति दूरभाषकेण दर्शिते शुभे स्थले।
सुदुष्करं भवेद् यदीह चिन्तने विचारणे,
गवेषयन्ति तज्जनाः स्वकीयदूरभाषके।।८

दिवानिशं निमज्जिताः जनाश्च दूरभाषके,
करे निधाय लोकयन्ति किन्नु दूरभाषके?।
बुभुक्षितेऽपि भोजनाय यान्ति दूरभाषके,
नराश्च खेलने रताः भवन्ति दूरभाषके।।९

युवानुरागिणो भवन्ति तेऽत्र दूरभाषके,
समन्विषन्ति रागिणीं सदैव दूरभाषके।
मिथस्तया समं लपन्ति भूरि दूरभाषके,
महाप्रभावके रतिः कथं न दूरभाषके।।१०

क्वचित् किमत्र जायते यथायथं प्रदर्श्यते,
सुदुष्करञ्च वेद्यते द्रुतं हि दूरभाषके।।
सुदुर्लभोऽपि लभ्यते सखेऽत्र दूरभाषके,
ह्यसीमदूरता विनश्यते च दूरभाषके।।११

महुर्मुहुः गणेषणेऽपि यद् बहिर्न लभ्यते,
क्षणेन तत् सुलभ्यते सदात्र दूरभाषके।
पतन्ति रागबन्धने जनाश्च दूरभाषके,
समर्पणं विधीयते समैः सुदूरभाषके।।१२

विपत्क्षणे सहानुभूतिरस्ति दूरभाषके,
सुखे पलेऽस्ति नन्दनं भृशं हि दूरभाषके।
स्पृहातरङ्गघोषणास्ति दिव्यदूरभाषके,
मनो व्यथायते सखे! गते च दूरभाषके।।१३

विचित्रचित्रणं क्वचित् प्रदर्शयन्ति यन्त्रके,
विहाय पुस्तकं जनाः पठन्ति दूरभाषके।
विनिन्दितं प्रशंसितं समस्तमस्ति यन्त्रके,
पठेद् भवांश्च काव्यमेतदत्र दूरभाषके।।१४

स्वग्रामजीवनस्य पौरजीवनस्य वृत्तदं,
जगत्तलस्य सूचनाप्रदं हि दूरभाषकम्।
पुरः पराजितं सुयन्त्रकस्य वृत्तपत्रकम्,
जने जने जवेन वर्धतेऽत्र दूरभाषकम्।।१५

सुदिव्यवस्त्रवेष्टिताः दिगम्बराश्च तेऽवशाः,
स्त्रियो नराश्च नर्तनानि दर्शयन्ति यन्त्रके।
बसेऽथ रेलयानके पथे गते च चत्वरे,
जनाः विलोकयन्ति तानि
चित्रकाणि यन्त्रके।।१६

गृहे भवेत् पतिः परन्तु सुन्दरी तु यन्त्रके,
कुमारिकेव दृश्यते समं नरेण भाषणे।
स्त्रियः यथार्थमत्र गोपयन्ति दूरभाषके,
गृहे पतिव्रतापि सा चरेन्नरांश्च यन्त्रके।।१७

नराश्च छद्मतां तथाऽऽचरन्ति दूरभाषके,
यथार्थगोपनेन ते स्त्रियस्तुदन्ति यन्त्रके।
अवैधता प्रवर्धते दिने दिनेऽत्र यन्त्रके,
करे करे प्रवञ्चनापणानि सन्ति यन्त्रके।।१८

विलोकितुं वधूं परस्य वासनापराः नराः,
भवन्ति सर्वदापि दूरभाषचालने रताः।
जनाश्च कामधूपधूपिताः विलासभाविताः,
वदन्ति दूरभाषकेऽस्ति धृष्टता विमुक्तता।।१९

कथाकथि प्रवर्तते हसाहसि प्रवर्धते,
ततश्च चाटुवाक्यबन्धनेन सा विलोभ्यते।
प्रियासुतोषणाय यत्यतेऽत्र दूरभाषके,
प्रियाधरस्य चुम्बनं प्रसार्यतेऽत्र यन्त्रके।।२०

दरिद्रता समृद्धता प्रकाश्यतेऽत्र यन्त्रके,
क्वचिद्भ्रमन्ति केऽधुना प्रसूचयन्ति ते समे।
क्व भुज्यते क्व गम्यते जनैस्तदत्र सूच्यते।
अतीव विस्मयोऽस्ति मे निरर्थकेऽत्र
यन्त्रके।।२१

अनेकरूपधारकाः नराः भवन्ति यन्त्रके,
दिवानिशं प्रवञ्चकाः प्रवञ्चयन्ति यन्त्रके।
सदैव पश्यतोहराः धनं हरन्ति यन्त्रके,
न साहचर्यमस्ति भासनं
सखेऽस्ति यन्त्रके।।२२

अहोऽस्थिकम्पके प्रशीतके हिमालये गते,
तथोष्णदक्षिणप्रदेशके मनोरमे गते।
तथा विलासितामये विदेशदर्शने सखे!
धरन्ति चित्रकर्षणाय दूरभाषकं समे।।२३

विपद्भिरर्दिताः जनाः रुदन्ति दूरभाषके,
समुत्सवे रताश्च ते हसन्ति दूरभाषके।
विभिन्न-नाटकानि पुस्तकानि दूरभाषके,
ह्युपद्रवाश्च नृत्यगीतकानि दूरभाषके।।२४

विशालवाङ्मयं मयाऽधीतञ्च दूरभाषके,
कवित्वकौशलं मया विलिख्यतेऽत्र यन्त्रके।
जनैः प्रपठ्य तच्च मे प्रतिक्रिया विधीयते,
सुरोचनाय यन्त्रके कराङ्गुलिः प्रणोद्यते।।२५

रचयिता
**डॉ. युवराजः भट्टराई**
सामवाप्तसाहित्याकादेमीयुवपुरस्कारः



# तिरुपतिपुरे रम्ये विश्वविद्यालयाङ्गणे

संस्कृतस्य समुत्कर्षो विशेषोऽस्ति जने जने
महेश्वरी महाकाली महालक्ष्मीर्महीयसी
ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।१।
यावत् स्थास्यन्ति गिरयः सरितश्च महीतले
तावत् संस्कृतवाग्देवी लोकेऽस्मिन् प्रचलिष्यति ।२।
अमृतं संस्कृतं मित्रं मधुरं काव्यसुन्दरम्
ज्ञानविज्ञानधीयुक्तं सर्वत्रापि समादृतम् ।३।
संस्कृतं जीवनं नित्यं संस्कृतिः प्राणसम्मिता
संस्कृतोत्कर्षघस्रेऽस्मिन् भवतु मोदनन्दिता ।४।
भाषासु मधुरा दिव्या गीर्वाणभारती सदा
ततोऽस्मिन् ह्युत्सवे तावज्जयतात् जयतात् मुदा।५।
सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्
संस्कृतस्य प्रसाराय स्वीकुर्मः कटिबद्धताम् ।६।
संस्कृतस्य विकासाय संस्कृतेश्च समन्वये
उत्कर्षोत्सवसंस्कृतिमावर्षं पालयामहे ।७।
तिरुपतिपुरे रम्ये विश्वविद्यालयाङ्गणे
संस्कृतस्य समुत्कर्षो विशेषोऽस्ति जने जने ।८।
संस्कृतं संस्कृतं नूनं संस्कृतं संस्कृतं मुदा ।
संस्कृतं संस्कृतं सर्वं संस्कृतं संस्कृतं सदा ।९।
सुभाषितरसास्वादो वाग्विलासशुभाशयः ।
शोभते सुतरां सम्यक् सुसंस्कृतसमाश्रयः ।१०।
श्रूयतां श्रूयतां साधो शुभं सर्वं शिवं तथा ।
साध्यतां साध्यतां सर्वं सत्कार्यं संस्कृतं यथा ।११।
सदनं संस्कृतं सद्यः सकलञ्च सुसंस्कृतम् ।
स्वकीयं संस्कृतं सर्वं भवन्तु सम्भवन्तु नः ।१२।
शंसति संस्कृतं शक्रः श्रीनिवासश्च शङ्करः ।
श्रीरामो बलरामोऽपि श्रीकृष्णश्च सुखान्वितः ।१३।
समेषां सर्वसत्त्वानां स्वारस्यं संस्कृतं भृशम् ।
श्रीशस्य सूनूनां सम्यक् संस्कृतं सम्बलं शुभम् ।१४।
अत्र वा तत्र वा कुत्र सर्वत्राऽपि विशेषतः ।
भारते संस्कृतं भ्रातः! सम्यक् भाति समन्ततः ।१५।
समेषां सरसाभाषं संस्कृतं सुरसेवितम्
सर्वत्र प्रसरेत्साधु सत्यं शिवञ्च सुन्दरम् ।१६।
नो तावत्भारते देशे सर्वत्रापि जने जने
पृथिव्यां सर्वदेशेषु संस्कृतन्नु गणे गणे ।१७।
ग्रामेषु नामसु स्वेषु रामेषु रमणेष्वपि
यामेषु कामकामेषु संस्कृतन्नु चतुर्दिशि ।१८।
सायं प्रातः प्रदोषेऽपि सन्ध्यावन्दनचन्दने
पूजने नन्दने ज्ञाने संस्कृतं नो जने जने ।१९।
संस्कृतभाषणं वाटे घाटे हट्टे नटे नटे
संस्कृतभारतीसंस्था त्वानयति तटे तटे ।२०।
सन्ततं संस्कृतं भाष्यं ग्रास्यञ्च संस्कृताजुषम्
रास्यन्नु संस्कृताभाषं यास्यञ्च संस्कृतादिशम् ।२१।
शंस्यतां शंस्यतां सद्यः सम्यक् साधु सुशोभनम् ।
सेव्यतां संस्कृतं सर्वं सत्यं शिवञ्च सुन्दरम् ।२२।

रचयिता - आचार्यः डा.रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः





# "संस्कृत कथा मञ्जरी"

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

"अथ भोजराज्यस्य सिंहासनोङ्ग्वारकथा"

अथ काले भोजराजः राज्यं प्राप। तस्मिन् राज्यं कुर्वति, एकदा कश्चित् ब्राह्मणो यत्र सिंहासनं निक्षिप्तं, तत् क्षेत्रं कृष्ट्वा यवादीनवपत्। तस्मिन् क्षेत्रे महत् फलमभूत्। स ब्राह्मणः यत्र तत् सिंहासनं निक्षिप्तं तदुच्चस्थानमिति मत्वा, पक्षिणाम् उत्थापनार्थं तदुपरि मञ्चं क्वत्वोपविश्य पक्षिण उत्थापयति। ततः एकदा भोजराजो विहारं कर्तुं सकलराजकुमारैः समवेतस्तत्क्षेत्रसमीपं यावद्गच्छति, तावन्मञ्चोपरिस्थितेन ब्राह्मणेनोक्तं- भो राजन्! एतत् क्षेत्रं सम्यक् फलितमस्ति, ससैन्यः समागत्य यथेच्छं भुज्यताम्; अश्वेभ्यचणका दीयन्ताम्। अद्य मज्जन्म सफलमभूत्, यतो भवान् ममातिथिर्जातः; ईदृशः प्रस्तावः कदा सम्पद्यते? तच्छ्रुत्वा स राजा ससैन्यः क्षेत्रमध्ये प्रविष्टः। अथ ब्राह्मणोऽपि मञ्चकादवरुह्य राजानं क्षेत्रमध्यं स्थितं भणति- भो राजन्! किमयमधर्मः क्रियते, इदं ब्राह्मणक्षेत्रं विनाश्यते त्वया? जनैः यदि अन्यायः क्रियते, प्रतिकारार्थं तुभ्यं निवेद्यते, त्वमेवान्यायं कर्तुं प्रवृत्तः; इदानीं को वा निवारयिष्यति? भवान् धर्मशास्त्राभिज्ञय, ब्राह्मणद्रव्यं कथं नाशयति? इति तेनोक्तं श्रुत्वा राजा यावत् क्षेत्राबहिः सपरिवारो निर्गच्छति, तावत् पक्षिणः समुत्थाय पुनः मञ्चमारूढो ब्राह्मणो वदति- भो राजन्! किमिति गम्यते? क्षेत्रं साधुफलितंमस्ति, यावनालकदण्डान् अश्वादयो भक्षयन्तु, उर्वारुकफलानि सन्ति उपभुज्यन्ताम्। पुनर्ब्राह्मण-वचनमाकर्ण्य सपरिवारो राजा यावत् क्षेत्रमध्ये प्रविशति, तावत् पक्ष्युत्थापनार्थं मञ्चादवरुह्य स पुनस्तथैव अभणत्।

ततो राजा स्वमनसि विचारयति- अहो आश्चर्यम्! यदा अयं ब्राह्मणो मञ्चमारोहति, तदाऽस्य चेतसि 'दातव्यं; भोक्तव्यम्' इति ब्रुविरुत्पद्यते, यदा अवतरति, तदा दीनबुद्धिर्भवति, तदहं मञ्चमारुह्य पश्यामि इति मञ्चमारुरोह।

भोजराजस्य चेतसि तदा वासना एवमभूत- "विश्वस्यार्तिः, परिहरणीया, सर्वस्य लोकस्यापि दारिद्रयं सम्यक् निवारणीयं, दुष्टा दण्डनीयाः, सज्जनाः पालनीयाः, प्रजा धर्मेण रक्षणीयाः, किं बहुना- अस्मिन् समये यदि कश्चिच्छुरौरमपि प्रार्थयिष्यति तदपि देयम् "इति आनन्दपरिपूर्णः पुनर्विचायति- अहो! एतत् क्षेत्रमस्य एवंविधां बुद्धिमुत्पादयति। इति विचार्य ब्राह्मणमाहूय अवादीत्- भो ब्राह्मण! तवैतस्मात् क्षेत्रात् कियल्लाभो भवति? अहमेतत् क्षेत्रं क्रेतुमिच्छामि। ब्रह्मणेनोक्तं- भो राजन्! सकलकुशलेन त्वया अविदितं किमपि नास्ति, यदर्हति तत् करोतु। राजा नाम साक्षात्विष्णोरवतारभूतः तस्य दृष्टिर्यस्योपरि पतति, तस्य दैन्यदुर्भिक्षादयो नश्यन्ति। राजा हि साक्षात् कल्पवृक्षः, स त्वं मम दृष्टेर्गोचरोऽभूः, अद्य मम दैन्यदारिद्र्यादीनामवसानं जातं, क्षेत्रं कियत्?

ततो राजा ब्राह्मणं धनधान्यादिना परितोष्य तत् क्षेत्रं गृहीत्वा मञ्चकाधः खानयितुं प्रारम्भमकार्षीत्। पुरुषप्रमाणे गर्ते जाते शिलैका सुमनोहरा अवलोकिता।

तदधः चन्द्रकान्तशिलाविनिर्मितं, नानारत्नखचितं, द्वात्रिंशतपुत्तलिकाभिर्युक्तम् अतिरमणीयं दिव्यमेकं सिंहासनमपश्यत्। तत्सिंहासनं दृष्ट्वा भोजराजः परमानन्दलहरीपरिपूर्णहृदयो भूत्वा सिंहासनं ग्रामं प्रति नेतुं यावदुच्चालयति तावदधिकं गुरु भवति, नोच्चलति च। ततो मन्त्रिणमवदत्- भो मन्त्रिन्! किमर्थमेतत् सिंहासनं नोच्चलति? मन्त्रिणोक्तं राजन्! एतत् सिंहासनं दिव्यमपूर्वञ्च बलिहोमपूजादिकं विना नोच्चलिप्यति तव साध्यश्च न भविष्यति इति।

तस्य वचनं श्रुत्वा राजा ब्राह्मणान् आहूय, तैः सर्वमपि विधानं कारितवान्। ततस्तत् सिंहासनं लघु भूत्वा स्वयमेवोच्चलति स्म।

## " अथ भानुमतीकथाऽवतरणिका"

तत् दृष्ट्वा राजा मन्त्रिणमुवाच-- भो मन्त्रिन् ! एतत् सिंहासनं प्रथमं ममासाध्यमभवत्, परन्तु इदानीं तव बुद्धिप्रभावेण मम हस्तगतमासीत् | अहो! बुद्धिमतां संसर्गो साभाय सुखाय च भवति |ततो मन्त्रिणा भणितं -- भो राजन्! श्रुयतां यः स्वयं बुद्धिमान् न भवति, अन्येषामपि बुद्धिं न श्रुणोति, स सर्वथा नाशं प्राप्नोति | त्वं तथाविधो न भवसि,बुद्धिमानपि आप्तवचनं श्रुणोषि, अतस्त्वं सकलकार्येषु अन्तरायो नास्ति | राजा अब्रवीत्-- योऽनर्थकार्यं निवारयति, आगाम्यर्थं साधयति च, स एव मन्त्री | मन्त्रिणोक्तम्-- भो राजन्! मन्त्रिणा स्वामिहितकार्य्यं कर्तव्यम् | यथा नन्दराजमन्त्रिणा बहुश्रुतेन राज्ञो ब्रह्महत्या निवारिता | भोजराजेनोक्तं-- कथमेतत्? मन्त्री वदति -- भो राजन् ! श्रुयतां कथयामि |

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# पितरौ सन्ततिम् सम्पत्तेः निष्कासयितुम् अधिकारः

## सर्वोच्चन्यायालयेन प्रयागराज-उच्चन्यायालयस्य आदेशः निरस्तः



सर्वोच्चन्यायालयेन बुधवासरे प्रतिपादितं यत् ज्येष्ठाः नागरिकाः स्वसन्ततीन् सम्पत्तेः निष्कासयितुं शक्नुवन्ति। न्यायालयेन उक्तं यत् वर्धमानस्य वयसः अर्थः असुरक्षा वा अपमानः न भवेत्। प्रत्येकं जनस्य जीवनपर्यन्तं गरिमापूर्णजीवनस्य अधिकारः वर्तते। सर्वोच्चन्यायालयेन प्रयागराज-उच्चन्यायालयस्य सः आदेशः अपि निरस्तः, येन पुत्रस्य स्नुषायाश्च गृहात् निष्कासनविषयकः अधिकरणस्य (ट्रिब्यूनल) आदेशः खण्डितः आसीत्। न्यायालयेन उक्तं यत् वृद्धानां गरिमायाः रक्षणार्थं सन्तानान् सम्पत्तेः निष्कासयितुम् अधिकरणस्य अधिकारः अस्ति। न्यायमूर्ति-पी. एस्. नरसिंह-न्यायमूर्ति-आलोक-अराधे महोदययोः पीठेन कथितं यत् अस्य नियमस्य उद्देश्यं वृद्धानां गरिमां सुरक्षां च सुनिश्चितां कर्तुम् अस्ति। एकस्य सभ्यसमाजस्य स्तरः प्रायः अनेन निर्धार्यते यत् सः स्वज्येष्ठेभ्यः कियतीं गरिमां, सम्मानं, सुरक्षां च प्रयच्छति। इदं प्रकरणं लखनऊनगरस्य विकास-नगर-निवासिनः रविकान्तगुप्तस्य याचिकया सम्बद्धम् आसीत्। श्रीगुप्तेन ५ जून २०२२ दिनाङ्के स्वपुत्रं गृहात् निष्कासयितुं मण्डलाधिकारिणः (जिला मजिस्ट्रेट) समीपे आवेदनं कृतम् आसीत्। इदं गृहं तस्य स्वोपार्जितसम्पत्तिः आसीत्। एषा वार्ता तदा प्रकाशम् आगता यदा गुप्तस्य ८१ वर्षीया माता गृहं त्यक्त्वा वृद्धाश्रमे निवासाय विवशा जाता। उपमण्डलाधिकारिणा (SDM) १५ नवम्बर् २०२२ दिनाङ्के पुत्रस्य निष्कासनस्य आदेशः दत्तः। मण्डलाधिकारिणा ९ अगस्त २०२३ दिनाङ्के एनम् आदेशं दृढीकुर्वता पुत्राय स्नुषायै च गृहं रिक्तं कर्तुं निर्देशः दत्तः। पुत्रेण स्नुषया च एषः आदेशः प्रयागराज-उच्चन्यायालये प्रत्यभियुक्तः। उच्चन्यायालयेन कथितम् आसीत् यत् २००७ तमस्य वर्षस्य अधिनियमः वृद्धेभ्यः स्वसम्पत्तेः सन्तानानां निष्कासनस्य अधिकारं न प्रयच्छति। तदनन्तरम् उभौ आदेशौ निरस्तौ कृतौ।

सम्प्रति सर्वोच्चन्यायालयेन प्रतिपादितं यत् अधिकरणस्य आदेशे हस्तक्षेपं कृत्वा उच्चन्यायालयेन प्रमादः कृतः। न्यायालयेन स्पष्टीकृतं यत् पोषणाय सुरक्षायै च आवश्यकतायां सत्याम् अधिकरणं निष्कासनस्य आदेशं दातुं शक्नोति। न्यायालयेन उक्तं यत् अधिनियमस्य ७ धारा-अन्तर्गतम् अधिकरणानां निर्माणं जातम्, तथा च ८ धारा तानि व्यवहाराधिकारस्य (सिविल कोर्ट) शक्तीः प्रयच्छति। अपरपक्षे २७ धारा व्यवहाराधिकार-न्यायालयस्य क्षेत्राधिकारं प्रतिबध्नाति। अतः अधिकरणस्य समीपे नियमस्य उद्देश्यं परिपालयितुम् आवश्यकपदक्षेपं स्वीकर्तुं सामर्थ्यम् अपि वर्तते।